# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - आचार्य-२ ( Sem_4 )** **प्रश्नपत्र-३** **गुणाः - ७०**

**विषयः - पुराणेतिहासः** CC 5.4.11 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः** - 19/04/2016 **सन्दर्भग्रन्थः - ब्रह्मवैवर्तपुराणे प्रकृतिखण्डः**

---

**युनिट-१**

**प्रश्न-१ ससन्दर्भं कस्याप्येकस्य व्याख्या विधेया ।** **०४**

१. स्मरन्ति ये यत्र तत्र मां विपत्तौ भयान्विताः । तांस्तत्र गत्वा रक्षामि चक्रहस्तस्त्वरान्विताः ॥

२. ज्ञानं देहि स्मृतिं देहि विद्यां विद्याधिदेवते । प्रतिष्ठां कवितां देहि शक्तिं शिष्यप्रबोधिनीम् ॥

**प्रश्न-२ कस्यापेकस्योत्तरं सविस्तरं लिख्यताम् ।** **१२**

१. सरस्वतीपूजाविधानं कवचं च वर्णयत ।

२. याज्ञवल्क्येन कृता सरस्वत्याः स्तुतिः ।

३. गङ्गोत्पत्तिप्रसङ्गसारं विवेचयत ।

**प्रश्न-३ कयोश्चिद् द्वयोः संक्षेपेणोत्तरं लिखत ।** **०४**

१. सरस्वतीस्तवने कति श्लोकाः सन्ति?

२. प्रकृतिखण्डे कति अध्यायाः सन्ति?

३. तुलसी स्वप्ने कं ददर्श?

**युनिट-२**

**प्रश्न-४ कस्याप्येकस्य ससन्दर्भं व्याख्या कार्या ।** **०४**

१. असंख्यानि च विश्वानि पवित्राणि यया सदा । तां विश्वपावनीं देवीं विरहेण स्मराम्यहम् ॥

२. कृष्णजीवनरूपा या शश्वप्रियतमा सती । तेन कृष्णजीवनीति मम रक्षतु जीवनम् ॥

**प्रश्न-५ कस्याप्येकस्योत्तरं सविस्तरं लिख्यताम् ।** **०८**

१. तुलसीमाहात्म्यम् ।

२. तुलसीशङ्खचूडयोः विवाहः ।

**प्रश्न-६ प्रदत्तेभ्यः त्रायाणाम् एकेन वाक्येन उत्तरं दत्त ।** **०३**

१. शङ्खचूडः क आसीत्?

२. ब्रह्मवैवर्तपुराणे कति कण्डाः?

३. तुलस्याः पातिव्रत्यं केन भग्नम्?

४. सावित्री केन सह विवाहमकरोत्?

५. गान्धर्वविवाहेन कौ विवाहितौ भवतः?

## युनिट-३

**प्रश्न-७ श्लोकद्वयस्य ससन्दर्भं व्याख्या कार्या । ०४**

१. ऐश्वर्यं विपदां बीजं ज्ञानप्रच्छन्नकारणम् । मुक्तिमार्गार्गलं दार्ढ्यं हरिभक्तव्यपायकम् ॥

२. जन्ममृत्युजरारोगशोकभीताङ्कुरं परम् । सम्पत्तितिमिरान्धं च मुक्तिमार्गं न पश्यति ॥

**प्रश्न-८ कस्याप्येकस्योत्तरं सविस्तरं लिख्यताम् । ०८**

१. महालक्ष्मीस्तोत्रम् ।

२. श्रीकृष्णस्वरूपवर्णनम् ।

**प्रश्न-९ त्रयाणाम् एकवाक्येन उत्तरं यच्छत । ०३**

१. दुर्वासा महालक्ष्मीं कथं शशाप?

२. इन्द्रः कस्य शापेन लक्ष्मीहीनः सम्भूतः?

३. वृषभानोः कन्यायाः नाम किम्?

४. नारायण – इति शब्दस्य का व्युत्पत्तिः?

५. पुरन्दर अर्थात् कः?

## युनिट-४

**प्रश्न-१० ससन्दर्भं कस्याप्येकस्य व्याख्या विधेया । ०४**

१. शिवेति मङ्गलार्थं च चकारो दातृपाचकः । मङ्गालनां य स शिवः परिकीर्तितः ॥

२. सिन्दूरबिन्दुना चारुसीमन्ताधः स्थलोज्जलाम् । रासे रासेश्वरयुतां राधां रासेश्वरीं भजे ॥

**प्रश्न-११ कस्याप्येकस्योत्तरं सविस्तरं लिखत । १२**

१. इन्द्रेण कृता मनसादेव्याः स्तुतिः ।

२. श्रीराधिकायाः प्राकट्यम् ।

**प्रश्न-१२ द्वयोः संक्षेपेण उत्तरं दत्त । ०४**

१. सुयज्ञः केन मन्त्रजापेन गोकुलं गतः?

२. श्रीकृष्णशब्दस्य का व्युत्पत्तिः?

३. ब्रह्मणा कस्मिन् तीर्थे तपः अतप्यत?

४. सुयज्ञः कः आसीत्?